# Vidarbha Ayurved Mahavidyalaya Amravati

# and

# Sanskrit Bharati Amravati

# श्लोक संहिता पठन स्पर्धा - 2023

# द्रव्यगुण

१)आमलकी  :-

हरीतकीसमं धात्रीफलं किन्तु विशेषतः ।
रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ।। भा. प्र.

२)हरिद्रा :-

हरिद्रा कटुकातिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ।। भा. प्र.

३)आर्द्रक – शूंठी :-

आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी मता ।
कटुका मधुरा पाके रूक्षा वातकफापहा ।
ये गुणाः कथिताः शुण्ठेस्तेऽपि सन्त्यार्द्रकेऽखिला ।। भा. प्र.

४)कण्टकारी :-

कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ।
रूक्षोष्णा पाचनी कासश्वासज्वर कफानिलान् ।
निहन्ति पीनसश्वासपार्श्वपीडाहृदामयान् ।। भा. प्र.

५)वासा:-

वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघु शीतस्तृडर्तिकृत् ।
श्वासकासज्वरच्छर्दि मेहकुष्ठक्षयापहः ।। भा. प्र.

६)तुलसी:-

तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तजित् ।
दीपनी कुष्ठहृत् श्वासपार्श्वरुक्कफवातजित् । भा. प्र.

७)अश्वगंधा :-

अश्वगंधानिलश्लेष्मश्वित्रशोथक्षयापाहा ।
बल्या रसायनी तिक्ता कषायोष्णाऽतिशुक्रला । भा. प्र.

८)शतावरी :-

शतावरी गुरुःशीता तिक्ता स्वाद्वी रसायनी ।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ।
शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित् ।। भा. प्र.

९)शिरीष :-

शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः ।
दोषशोषविसर्पघ्नः कासव्रणविषापहः । । भा. प्र.

१०)शिग्रु :-

शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ।
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् ।
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः ।
चक्षुष्यः कफपित्तघ्नो विद्रधिश्वयथुकृमीन् ।
मेदोपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् ।। भा. नि.

११)दूर्वा :-

दूर्वाः कषायाः मधुराश्च शीताः पित्ततृषारोचकवान्तिहन्त्र्यः ।
सदाहमूर्च्छाग्रहभूतशान्तिश्लेष्मश्रमध्वंसनतृप्तिदाश्च ॥रा. नि.

## अष्टांगहृदय

१)निरूहबस्तिच्या द्रव्यांचा गण –

मदनकुटजकुष्ठदेवदालीमधुकवचादशमूलदारुरास्नाः ।
यवमिशिकृतवेधनं कुलत्था मधु लवणं त्रिवृत्ता निरूहणानि ।। अ.हृ.सु 15/3

२)निद्रानाशजन्य विकार

निद्रानाशादङ्गमर्दशिरोगौरवजृम्भिकाः ।
जाड्यग्लानिभ्रमापक्तितन्द्रा रोगाश्च वातजा: ।।   अ.हृ.सु 7/64

३)सद्‌वृत्त

हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृते ।।
सम्भिन्नालापं व्यापादमभिध्यां दृग्विपर्ययम् ।
पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ।।   अ.हृ.सु 2/21 -22

४)पुराण घृत: -

मदापस्मारमूर्च्छायशिर:कर्णाक्षियोनिजान् ।
पुराणं जयति व्याधीन् व्रणशोधनरोपणम् ।।   अ.हृ.सु 5 /40

५)द्रवद्रव्यविज्ञानीय अध्याय :

तप्त, अतप्त व धारोष्ण दूध –
पयोऽभिष्यन्दी गुर्वामं, युक्त्या शृतमतोऽन्यथा ।।
भवेद्गरीयोऽतिशृतं, धारोष्णममृतोपमम् ।   अ.हृ.सु 5/28

६)दण्डालसक-

अत्यर्थदुष्टास्तु दोषा दुष्टामबद्धखाः ।
यान्तस्तिर्यक्तनुं सर्वां दण्डवत्स्तम्भयन्ति चेत् ।।
दण्डकालसकं नाम तं त्यजेदाशुकारिणम् ।        अ.हृ.सु 8/12

७)कवल ग्रहण-

मन्याशिरःकर्णमुखाक्षिरोगाः प्रसेककण्ठामयवक्त्रशोषाः ।
हल्लासतन्द्रारुचिपीनसाश्च साध्या विशेषात्कवलग्रहेण ।। अ.हृ.सु २२/१२

८)अंजन निषेध / अनर्ह –

नाञ्जयेद्भीतवमितविरिक्ताशितवेगिते ।
क्रुद्धज्वरिततान्ताक्षिशिरोरुक्शोकजागरे ।। २३ ।।
अदृष्टेऽर्के शिरःस्नाते पीतयोर्धूममद्ययोः ।
अजीर्णेऽग्न्यर्कसन्तप्ते दिवासुप्ते पिपासिते ।। अ.हृ.सु. २३/२४

९) तैल उपयोग -

ग्रन्थिनाडीकृमिश्लेष्ममेदोमारुतरोगिषु ।
तैलं लाघवदार्यार्थिक्रूरकोष्ठेषु देहिषु ।। अ.हृ.सु.९/१६

१०) उत्तरबस्तिचे यंत्र -

आतुराङ्गुलमानेन तन्नेत्रं द्वादशाङ्गुलम् ।
वृत्तं गोपुच्छवन्मूलमध्ययोः कृतकर्णिकम् ‖
सिद्धार्थकप्रवेशाग्रं श्लक्ष्णं हेमादिसम्भवम् ।
कुन्दाश्वमारसुमनःपुष्पवृन्तोपमं दृढम् ‖अ.हृ.सु१९/७१-७२

## रसशास्त्र भैषज्य

१)तालीसादिचर्ण

तालीसं मरिचं शुण्ठी पिप्पली वंशरोचना |
एकद्वित्रिचतुः पञ्चकर्षै र्भागान्प्रकल्पयेत् ।।
एलात्वचोस्तु कर्षार्द्ध प्रत्येकं भागमा क्षरेत्
द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः ।।
तालीसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतम् ।
कासश्वासज्वरहरं छर्द्यतीसारनाशनम् ।।
शोषाध्मानहरं प्लीहा ग्रहणी पाण्डुरोगजित् ।
पक्त्वा वा शर्करा चूर्णं क्षिपेत्स्याद् गुटिका ततः ।।
शा.म.६ / १३२ - १३५

२)सुतशेखररस

शुद्धं सूतं मृतं स्वर्ण टङ्कणं वत्सनाभकम् ।
व्योषमुन्मत्तबीजं च गन्धकं ताम्र भस्मकम् ॥
चातुर्जातं शंखभस्मं बिल्वमज्जा कचोरकम् ।

सर्व समं क्षिपेत्खल्वे मदर्य भृंगसैर्दिनम् ॥
गुञ्जामात्रां वटीकृत्वा भक्षयेन्मधुसर्पिषा ॥ यो.र. ३३ / १- २

३)चित्रकादीवटी

चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।
व्योषं हिंङ्ग्वजमोदाच चव्यचैकत्र चूर्णयेत् ।।
सौवर्चलं सैंधवं च बिडमौद्भिदमेव च ।
सामुद्रेण समं पञ्चलवणान्यत्र योजयेत् ।
गुडिकां मातुलुङ गस्य दाडिमस्य रसेन वा ।
कृता विपाचय त्यामं दीपयत्याशु च
अनिलम् ।। भै.र. ८/ २६-२७

४)क्षीरबलातैल-

बलाकल्ककषायभ्यां तैलं क्षीरसमं पचेत् ।
सहस्त्रशतपाकं तद्वातासृग्वातरोगनुत् ।।
रसायनं मुख्यतममिन्द्रियाणां प्रसादनम् ।
जीवनं बृंहणं स्वयं शुक्रासृग्दोषनाशनम् ।। अ. ह.चि.२२/ ४५ - ४६

५)त्रिफला गुग्गुलु

त्रिफलं त्रिफलाचूर्ण कृष्णाचूर्ण पलोन्मितम् ।
गुग्गुलं पाञ्चपलिक क्षोदयेत्सर्वमेकतः ॥
ततस्तु गुटिकां कृत्वा प्रयुञ्ज्याव्दह्नयपेक्षया ।
भगन्दरं गुल्मशोथावर्शांसि च विनाशयेत् ॥ शा .म . ७ /८२- ८३

६)गोक्षुरादिगुग्गुलु

अष्टाविंशतिसंख्यानि पलान्यानीय गोक्षुरात् ।
विपचेत्वड्गुणे नीरे क्वाथो ग्रा हयोऽर्धशेषितः ॥
ततः पुनः पचेत्तत्र पुरं सप्तपलं क्षिपेत्।
गुढपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत् ॥
त्रिकटु त्रिफला मुस्तं चूर्णितं पलसप्तकम् ।
ततः पिण्डीकृतस्याऽस्य गुटिकामुपयोजयेत् ॥
हन्यात्प्रमेह कृच्छ्र च प्रदरं मूत्रघातकम् ।
वातास्त्रं वातरोगांश्च शुक्रदोषं तथाऽश्मरीम् ॥ शा.म. ७ /८४- ८७

७)अविपत्तिकर चूर्णम् -

त्रिकटु त्रिफला मुस्तं विडञ्चैव विडङ्गकम् ।
एला पत्रञ्च चूर्णानि समभागानि कारयेत् ॥
सर्वमेकीकृतं यावल्लवङ्गं तत्समं भवेत्।
सर्वचूर्णद्विगुणितं त्रिवृच्चुर्ण प्रदापयेत् ॥
भोजनादौ तथा मध्ये खादेन्मापाष्टकं शुभम् ।
सर्वमेकीकृतं यावत्तावच्छर्करयाऽन्वितम् ॥
अम्लपित्तं निहन्त्याशु विबन्धं मलमूत्रयोः ।
अग्निमानद्यभवान् रोगान् नाशयेद्विकल्पतः ॥
प्रमेहान् विंशतिञ्चैव सर्वदुर्नामनाशनम् ।
अविपत्तिकरं चूर्णमगस्त्यविहितं शुभम् ॥ भै.र. ५६ /२५-२९

८)हरिद्राखण्डः-

हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा ।

क्षीराढकेन संयुक्तं खण्डस्यार्द्धशतं तथा ॥
पचेन्मृद्वग्निना वैद्यो भाजने मृन्मये दृढे|
कटुत्रिकं त्रिजातश्च क्रिमिघ्नं त्रिवृता तथा ॥
त्रिफला केशरं मुस्तं लौहं प्रति पलं पलम् |
सञ्चूर्ण्य प्रक्षिपेत्तत्र तोलकार्द्धन्तु भक्षयेत् ||
कण्डू विस्फोटदद्रूणां नाशनं परमौषधम् ।
प्रतप्तकाञ्चनाभासो देहो भवति नान्यथा ॥
शीतपित्त उदर्द कोठान् सप्ताहादेव नाशयेत् ।
हरिद्रा नामतः खण्डः कण्डूनां परमौषधम् || भै.र .५५ / १३-१७

९)अभयादिमोदक

अभया मरिचं शुण्ठीविडङ्गामलकानि च ॥
पिप्पलीपिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ।
एतानि समभागानि दन्ती च द्विगुणा भवेत् ॥
त्रिवृदष्टगुणा ज्ञेया षड्गुणा चात्रशर्करा ।
मधुना मोदकान् कृत्वा कर्षमात्र प्रमाणतः ॥
एकेकं भक्षयेत्प्रातः शीतं चानुपिबेज्जलम् ।
तावद्विरिच्यते जन्तुर्यावदुष्ण न सेवते ||
पानाहारविहारेषु भवेन्निर्यन्त्रणः सदा ।
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ॥
दुर्नाम कुष्ठगुल्मार्शोगलगण्डभ्रमोदरान् ।
विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयान् ॥
वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीम् ।
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत् ॥
सततं शीलनादेषां पलितानि विनाशयेत।
अभया मोदका ह्येते रसायनवराः स्मृताः ॥ शा.म.४ /२७ -३४

# चरक चिकित्सास्थान

१)ज्वराचे प्रत्यात्म लक्षण – (च. चि. ३/३१)

ज्वरप्रत्यात्मिकं लिङ्गं सन्तापो देहमानसः ।
ज्वरेणाविशता भूतं न हि किञ्चिन्न तप्यते ॥

२)उत्तान व गंभीर वात रक्ताची लक्षणे – ( च. चि. २९/२०,२१)

कण्डूदाहरुगायामतोदस्फुरणकुञ्चनैः ।
अन्विता श्यावरक्ता त्वग्बाह्ये ताम्रा तथेष्यते ॥
गम्भीरे श्वयथुः स्तब्धः कठिनोऽन्तर्भृशार्तिमान् ।
श्यावस्ताम्रोऽथवा दाहतोदस्फुरणपाकवान् ॥

३)गुल्म संप्राप्ति – ( च. चि. ५/६,७)

कफं च पित्तं च स दुष्टवायुरुद्धय मार्गान् विनिबद्ध्य ताभ्याम् ।
हृन्नाभिपार्श्वोदरबस्तिशूलं करोत्यथो याति न बद्धमार्गः ॥
पक्काशये पित्तकफाशये वा स्थितः स्वतन्त्रः परसंश्रयो वा ।
स्पर्शोपलभ्यः परिपिण्डितत्वाद् गुल्मो यथादोषमुपैति नाम ॥

४)प्रमेहाचे चिकित्सासूत्र- ( च. चि. ६/१५)

स्थूलः प्रमेही बलवानिहैकः कृशस्तथैकः परिदुर्बलश्च ।
संबृंहणं तत्र कृशस्य कार्यं संशोधनं दोषबलाधिकस्य ||

५)कुष्ठाची पूर्वरूपे- ( च. चि. ७/१२)

स्पर्शाज्ञत्वमतिस्वेदो न वा वैवर्ण्यमुन्नतिः ।
कोठानां लोमहर्षश्च कण्डूस्तोदः श्रमः क्लमः ॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
दाहः सुप्ताङ्गता चेति कुष्ठलक्षणमग्रजम् ।।

६)राजयक्ष्मा मध्ये पुरिष रक्षण – ( च. चि. ८/४१,४२)

तस्मिन्काले पचत्यग्निर्यदन्नं कोष्ठसंश्रितम् ।
मलीभवति तत्प्रायः कल्पते किंचिदोजसे ||
तस्मात् पुरीषं संरक्ष्यं विशेषाद्राजयक्ष्मणः ।
सर्वधातुक्षयार्तस्य बलं तस्य हि विड्बलम् ॥

७)उन्मादाची सामान्य लक्षणे- ( च. चि. ९/६)

धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च ।
अबद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ॥

८)अपस्मार चिकित्सा सिद्धांत- ( च. चि. १०/१४,१५)

तैरावृतानां हृत्स्रोतोमनसां संप्रबोधनम् ।
तीक्ष्णैरादौ भिषक् कुर्यात् कर्मभिर्वमनादिभिः ।।
वातिकं बस्तिभूयिष्ठैः पैत्तं प्रायो विरेचनैः ।
श्लैष्मिकं वमनप्रायैरपस्मारमुपाचरेत् ||

९)जाठराग्नी प्राधान्य – ( च. चि. १५/३९,४०)

अन्नस्य पक्ता सर्वेषां पक्तृणामधिपो मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥
तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः ।
पालयेत् प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः ॥

१०)उदावर्त चिकित्सासूत्र-    ( च. चि. २६/११)

तं तैलशीतज्वरनाशनाक्तं स्वेदैर्यथोक्तैः प्रविलीनदोषम् ।
उपाचरेद् वर्तिनिरूहबस्तिस्नेहैर्विरेकैरनुलोमनान्नैः।।

## अन्य महत्वपूर्ण श्लोक

१)कर्म पुरुष व्याख्या:-

पंचमहाभूत शरीरिसमवायः पुरुष इति ।
स एव कर्मपुरुषश्चिकित्साधिकृत: । सु. शा. १/२१

2) सद्योगृहित गर्भा लक्षणे:-

तत्र सद्योगृहितगर्भाया लिंगानि – श्रमो ग्लानिः पिपासा
सक्थिसदनं शुक्रशोणितयोरवबन्धः स्फुरणचं योने: ।

3)गर्भोत्पादक भाव:-

ध्रुवं चतुर्णा सान्निध्यात् गर्भः स्याद्विधिपूर्वकः ।
ऋतुक्षेत्राम्बु बीजानां सामग्र्यादंकुरो यथा । सु.शा. २/३५

4)स्रोतस व्याख्या:-

मूलात खादन्तरं देहे प्रसृतं त्वभिवाहि यत् ।
स्रोतस्यदिति विज्ञेयं सिराधमनी वर्जितम् ।। सु. शा. ९/१३

5) कोष्ठ व्याख्या:-

स्थानान्यामाग्नि पक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुक: फुफ्फुसश्च कोष्ठ इत्यभिधीयते ॥ ।।सु.चि.२/१२

6)रक्तवह स्रोतस:-

रक्तवहे द्वे, तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यः तत्र विध्दस्य श्यावांगता ज्वरो दाहः पाण्डुता शोणितागमनं रक्तनेत्रता च । सु. शा. ९/१२

7)शुध्द शुक्राचे लक्षण:-

स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगंधि च ।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभं तथा । सु. शा. २/१३
8)आहाराचे कार्य व महत्व :-

प्राणाः प्राणभृताम् अन्नम् लोकोऽभिधावति ।

वर्णप्रसादः सौस्वर्य जीवितं प्रतिभा सुखम् ।
तुष्टिः पुष्टिर्बलं मेधा सर्वमन्ने प्रतिष्ठितम् ।।    च.सू.अ.27/348

9)बालरोग  चिकित्सा –

दोषदूष्यमलाश्चैव महतां व्याधयश्च ये॥
त एव सर्वे बालानां मात्रा त्वल्पतरा मता ।
निवृत्तिर्वमनादीनां मृदुत्वं परतन्त्रताम ।।
वाक्चेष्टयोरसामर्थ्यं वीक्ष्य बालेषु शास्त्रवित् ।
भेषजं स्वल्पमात्रं तु यथाव्याधि प्रयोजयेत् ॥
मधुराणि कषायाणि क्षीरवन्ति मृदूनि च ।
प्रयोजयेद्भिषग्बाले मतिमानप्रमादतः ॥
च. चि. 30/282-285

१०)क्षार गुण –

नातितीक्ष्णमृदुः श्लक्ष्ण: पिच्छिलः शीघ्रग: सित: ।
शिखरी सुखनिर्वाप्यो न विष्यन्दी न चातिरुक् ।।
क्षारो दशगुणः शस्त्रतेजसोरपि कर्मकृत् ।
अ. हृ. 30/24-25